# संस्कृत वार्ता:

दिनाङ्क : 21/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारत-इटली-देशौ व्यापार-निवेश-आपूर्तिशृङ्खलां सुदृढीकर्तुं भारत-मध्यपूर्व-यूरोप-आर्थिक-वीथेः उत्तरोत्तर-विकासार्थं परस्परं सहमतिं प्रकटितवन्तौ ।
- सर्वकारेण कस्यापि सौन्दर्य-प्रसाधनोत्पादस्य सूचिकाभेषजत्वेन प्रयोगः उपभोक्तृभ्यः, विशेषज्ञेभ्यः अथवा सौन्दर्य-चिकित्सालयेभ्यः सर्वथा निषेधितम् ।
- स्वास्थ्य-सेवा-महानिदेशालयेन इबोला-संक्रमेण प्रभावित- देशेभ्यः आगच्छद्भ्यः अथवा पारगमनं कुर्वद्भ्यः यात्रिणां कृते कश्चन विशेष-स्वास्थ्य-परामर्श: प्रसारितः।
- तमिलनाडु-राज्ये मुख्यमन्त्रिणः सी.जोसेफ विजयस्य नेतृत्वयुते मन्त्रिमण्डले द्वात्रिंशत् जनाः सम्मिलिताः येषु चतस्रः महिला-मन्त्रिणः सन्ति।
- आईपीएल क्रिकेट-स्पर्धायां अद्य सायं अहमदाबाद-नगरे गुजरात-टाइटन्स तथा चेन्नई-सुपर-किङ्ग्स-दलयोः मध्ये प्रतिस्पर्धा भविष्यति।

-------------------------------

<u>प्रधानमन्त्री-इटली</u>

भारत-इटली-देशौ व्यापार-निवेश-आपूर्तिशृङ्खलां सुदृढीकर्तुं भारत-मध्यपूर्व-यूरोप-आर्थिक-वीथेः उत्तरोत्तर-विकासार्थं परस्परं सहमतिं प्रकटितवन्तौ । एकस्मिन् संयुक्त-वक्तव्ये, भारतस्य प्रधानमन्त्री नरेन्द्रमोदी तथा च तस्य इटली-समकक्षीया जॉर्जिया-मेलोनी इत्येतौ भारत-मध्यपूर्व-यूरोप-आर्थिक-कॉरिडोर इत्यत्र सहकार्याय स्वकीय-प्रतिबद्धतां ज्ञापितवन्तौ। अस्याः परियोजनायाः भूरिशः प्रशंसां कुर्वन्तौ उभौ नेतारौ, ऐषमः षड्विंशत्यधिक-द्विसहस्रतमे अस्य उपक्रमस्य प्रगतये **आईमेक**-मन्त्रिस्तरीय-गोष्ठ्याः प्रथमायोजने दृढ-पदक्षेपं स्वीकर्तुं प्रोत्साहितवन्तौ । रोम-नगरे प्रधानमन्त्रिणा नरेन्द्रमोदिना सह आयोजिते संयुक्त-संवाददातृ-सम्मेलने इटली-देशस्य प्रधानमन्त्री जॉर्जिया-मेलोनी **आईमेक** इत्येतं यूरोप-मध्यपूर्व-भारतदेशान् संयोजयितुं कश्चन महान् आर्थिक-सम्पर्क-मार्गः वर्तते इति वर्णितवती। तया प्रोक्तं यदस्मिन् व्यापार-निवेश-आपूर्तिशृङ्खला-स्थैर्यं दृढीकर्तुं महत् सामर्थ्यं वर्तते। मेलोनी इत्येषा

अवोचत् यत्, क्षेत्रीयान्तर-सम्पर्कस्य सुदृढीकरणं सर्वोपरि-प्राथमिकता अस्ति, तथा च उभावपि देशौ अस्य वीथि-मार्गस्य विकासं दृढतया समर्थयतः। उभावपि प्रधानमन्त्रिणौ पुनरपि प्रोक्तवन्तौ यत्, नवोन्मेषः, विज्ञानं, प्रौद्योगिकी च भारत-इटली-देशयोः मूलाधाराः सन्ति। अत्रावसरे प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत्, इटली-देशः स्वस्य विशिष्टाभिकल्पनायै सूक्ष्मता-कौशलाय च विश्व-विश्रुतोऽस्ति, अपरत्र भारतस्य ख्यातिः विशालतायै , प्रतिभायै , सुलभ-नवोन्मेषाय च वर्तते।

--------------------------------

<u>सर्वकार-प्रसाधनोत्पादः</u>

सर्वकारेण प्रोक्तं यत् कस्यापि सौन्दर्य-प्रसाधनोत्पादस्य सूचिकाभेषजत्वेन प्रयोगः उपभोक्तृभ्यः, विशेषज्ञेभ्यः अथवा सौन्दर्य-चिकित्सालयेभ्यः सर्वथा निषिद्धो वर्तते। केन्द्रीय-औषध-मानक-नियन्त्रण-सङ्गठनेन स्पष्टीकृतं यत्, प्रसाधन-सामग्र्यः केवलं मानव-शरीरे घर्षणाय , सेचनाय, प्रोक्षणाय अथवा विकिरणाय एव उद्दिष्टाः सन्ति। सङ्घटनेन प्रोक्तं यत्, विक्रयण-वितरणार्थं प्रसाधनानां निर्माणं तथा च आयात-प्रक्रिया प्रसाधन-नियम-विंशति-प्रतिविंशतिः इत्यस्य प्रावधानैः नियन्त्रिता भवति। सी.डी.एस.सी.ओ. इत्यनेन दृढीकृतं यत्, प्रसाधनोत्पन्नेषु प्रतिबन्धित-तत्वानामुपयोगः, नामपत्रे भ्रामकोक्तिः, संक्रमणोपचारार्थं सौन्दर्य-प्रसाधनानां प्रयोगः, तथा च सूचिकाभेषज-माध्यमेन एतेषाम् अनुप्रयोगः औषध-तथा-प्रसाधन-अधिनियम-नियमानाम् गम्भीरं उल्लङ्घनं मन्यते, यस्य कृते दण्डविधानं निश्चितं वर्तते।

--------------------------------

<u>इबोला-संक्रमणम्</u>

स्वास्थ्य-सेवा-महानिदेशालयेन इबोला-संक्रमणेन प्रभावितेभ्यः देशेभ्यः आगम्यमानानां अथवा तन्मार्गेण गच्छतां यात्रिणां कृते कश्चन विशेष-स्वास्थ्य-परामर्शः प्रसारितः। स्वास्थ्य-परामर्शानुसारं ये यात्रिणः काङ्गो-प्रजातान्त्रिक-गणराज्यं, युगाण्डा, तथा दक्षिण-सूडान-सदृशेषु

उच्च-संकट-युक्तेषु देशेषु भ्रमणं कृतवन्तः, तथा च येषु ज्वरः, शिरोवेदना, पीडा , अनिर्धारित-रक्तस्रावः वमनञ्चेत्यादीनि लक्षणानि दृश्यन्ते, ते सद्य एव चिकित्सकीय-सहायतां प्राप्तुं साग्रहं सूचिताः सन्ति। महानिदेशालयेन यात्रिणः अपि सचेतिताः यत्, ये केऽपि शङ्कितस्य अथवा पुष्टि-कृतस्य इबोला- संक्रमितस्य रक्तेन शरीर-द्रवेण वा सह प्रत्यक्ष-सम्पर्कं स्थापितवन्तः, तैः प्रवास-निर्गमन-प्रक्रियायाः पूर्वमेव विमानपत्तन-स्वास्थ्य-अधिकारिणे अथवा स्वास्थ्य-पटलस्य पुरतः अनिवार्यरूपेण विवरणं प्रदातव्यम्।

--------------------------------

<u>तमिलनाडु</u>

तमिलनाडु-राज्ये जोसेफ-विजयस्य नेतृत्वे शासनेन अद्य स्वमन्त्रिसभायाः विस्तारः कृतः, येन राज्ये संयुक्त-मन्त्रिसभायाः निर्माणस्य मार्गः प्रशस्तः । काङ्ग्रेस्-दलस्य द्वाभ्यां सह त्रयोविंशतिः नूतन-मन्त्रिणः मन्त्रिमण्डले समाविष्टाः। अनेन नूतनेन विस्तारेण मन्त्रिमण्डलस्य संख्या द्वात्रिंशत् यावत् वर्धिता, यस्मिन् मुख्यमन्त्री सी. जोसेफ् विजयः अपि अन्तर्भवति। काङ्ग्रेस्-दलम् अधुना प्रायः षट्-दशकानाम् अनन्तरं राज्य-मन्त्रिसभां प्रति प्रत्यागतः अस्ति। सप्तषष्ट्यधिक-नवदश-शततम-वर्षात् परं प्रथमवारम् एतत् राष्ट्रिय-दलम् तमिलनाडु-राज्यस्य मन्त्रिमण्डले प्रतिनिधित्वं प्राप्नोति। नव-विस्तारित-मन्त्रिसभायां चतस्रः महिला-मन्त्रिणः अपि सन्ति।

--------------------------------

<u>केरल-विधानसभा</u>

केरल विधानसभायाः नवगठितस्य प्रथम-सम्मेलनस्य आरम्भः अद्य तिरुवनन्तपुरम्-नगरे अभवत्। जी. सुधाकरन् इत्येषः नवनिर्वाचितान् सदस्यान् शपथं प्रदत्तवान्। अध्यक्ष-पदस्य निर्वाचनं श्वः भविष्यति। सत्तारूढेन यू. डी. एफ़्. इत्यनेन तिरुवञ्चूर् राधाकृष्णन् इत्येषः तस्मै पदाय नामाङ्कितः। विधानसभायां भाजपा-दलस्य त्रयः सदस्याः सन्ति, अतः स्पर्धात्मक-निर्वाचनस्य अपेक्षा वर्तते। बी. गोपकुमारः तस्य दलस्य अभ्यर्थिरूपेण घोषितः अस्ति, किन्तु विपक्षः एल्. डि. एफ़्. इदानीमपि निर्वाचन-विषये स्वस्य निर्णयं न उद्घाटितवान्।

--------------------------------

## पश्चिमबङ्गाल -वन्दे मातरम्

पश्चिमबङ्गाल-सर्वकारेण सम्पूर्णे राज्ये सर्वेषु मदरसा इत्येतेषु तत्क्षण-प्रभावेण 'वन्दे मातरम्' इत्यस्य गानम् अनिवार्यं कृतम्। अयं आदेशः मदरसा-शिक्षा-निदेशालयेन प्रसारितः। अधिसूचनायाः अनुसारं एषः निर्देशः सर्वकारीय-प्रारूप-मदरसा इत्यतेषु सर्वकारीय-अनुदान-प्राप्त-मदरसा इत्यतेषु, मान्यताप्राप्त-मदरसा इत्यतेषु, तथा च अल्पसङ्ख्यक-कार्यमन्त्रालयस्य एवं मदरसा-शिक्षा-विभागस्य अन्तर्गतं कार्यरतासु अनुमोदितासु शिशु-शिक्षा-केन्द्रेषु माध्यमिक-शिक्षा-केन्द्रेषु च प्रवर्तिष्यते।

--------------------------------

## राजनाथसिंहः

रक्षामन्त्री राजनाथसिंहः तथा दक्षिणकोरिया-देशस्य देशभक्ति-भूतपूर्वसैनिक-कार्य-मन्त्री क्वोन-ओह्-योल च अद्य सियोल-नगरस्य इमजिंगक-उद्याने भारतीय-युद्ध-स्मारकस्य संयुक्तरूपेण उद्घाटनम् अकुरुताम्। कोरियन्-युद्धस्य पञ्चसप्ततितमस्य वार्षिकोत्सवस्य स्मरणार्थम् आयोजितेषु कार्यक्रमेषु भागरूपेण निर्मितम् एतत् स्मारकं युद्धकाले भारतीय-सेनायाः, भारतस्य संरक्षण-बलस्य तथा च षष्टि- वायुसैनिक-क्षेत्रीय-चिकित्सालयस्य साहसस्य, त्यागस्य, मानवीय-सेवायाश्च सम्मानरूपेण वर्तते।

--------------------------------

## क्रिकेट-क्रीडा

आई पी एल क्रिकेट्-क्रीडायाम् अद्य सायङ्काले अहमदाबाद-नगरस्य नरेन्द्रमोदी क्रीडाङ्गणे गुजरात्-टाइटन्स्-दलं चेन्नै-सूपर्-किङ्ग्स्-दलं सम्मुखीकरिष्यति। क्रीडा सायं सार्ध-सप्तवादनतः आरभ्यते। गुजरात्-टाइटन्स्-दलेन पूर्वमेव अन्तिमचतुष्क-क्रीडायां स्वस्थानं निश्चितम्, चेन्नै-सूपर्-किङ्ग्स् इत्येतत् दलम् च अङ्कतालिकायां चतुर्थस्थानं प्राप्तुं स्वस्य सम्भावनां सुदृढीकर्तुं

प्रयतते। अत्रान्तरे, गत-रात्रौ कोलकत्ता-नगरस्य ईडन-गार्डन मध्ये कोलकाता-नाइट्-राइडर्स्-दलेन मुम्बई-इण्डियन्स्-दलं चतुर्भिः स्तोभैः पराजितम् ।

।। इति वार्ता: ।।